# Shri Anantapadmanabha Mangala Stotram

# શ્રીઅનન્તપદ્મનાભમઙ્ગલસ્તોત્રમ્

## Document Information

Text title : Ananta Padmanabha Mangala Stotram

File name : anantapadmanAbhamangalastotram.itx

Category : vishhnu, viShNu, mangala, stotra

Location : doc_vishhnu

Latest update : July 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 4, 2025

*sanskritdocuments.org*

# શ્રીઅનન્તપદ્મનાભમઙ્ગલસ્તોત્રમ્

શ્રિયઃકાન્તાય કલ્યાણનિધયે નિધયેઽર્થિનામ્ ।
શ્રી શેષશાયિનેઽનન્તપદ્મનાભાય મઙ્ગલમ્ ॥ ૧॥

સ્યાનન્દૂરપુરીભાગ્યભવ્યરૂપાય વિષ્ણવે ।
આનન્દસિન્ધવેઽનન્તપદ્મનાભાય મઙ્ગલમ્ ॥ ૨॥

હેમકૂટવિમાનાન્તઃ ભ્રાજમાનાય હારિણે ।
હરિલક્ષ્મીસમેતાય પદ્મનાભાય મઙ્ગલમ્ ॥ ૩॥

શ્રીવૈકુણ્ઠવિરક્તાય શઙ્ખતીર્થામ્બુધેઃ તટે ।
રમયા રમમાણાય પદ્મનાભાય મઙ્ગલમ્ ॥ ૪॥

અશેષ ચિદચિદ્વસ્તુશેષિણે શેષશાયિને ।
અશેષદાયિનેઽનન્તપદ્મનાભાય મઙ્ગલમ્ ॥ ૫॥

યત્પદં પરમં સેવ્યં સદા પશ્યન્તિ સૂરયઃ ।
સેનાપતિમુખાસ્તસ્મૈ પદ્મનાભાય મઙ્ગલમ્ ॥ ૬॥

ચુતુર્મુખેશ્વરમુખૈઃ પુત્રપૌત્રાદિશાલિને ।
સમસ્તપરિવારાય પદ્મનાભાય મઙ્ગલમ્ ॥ ૭॥

દિવાકરયતીશાનયોગિહૃત્પદ્મભાનવે ।
પરસ્મૈ બ્રહ્મણેઽનન્તપદ્મનાભાય મઙ્ગલમ્ ॥ ૮॥

પરાઙ્કુશપ્રબન્ધોક્તિપ્રથિતાય પરમાત્મને ।
પૂર્ણાય મહતેઽનન્તપદ્મનાભાય મઙ્ગલમ્ ॥ ૯॥

વઞ્ચિભૂપશિરોરત્નરશ્મિનીરાજિતાઙ્ઘ્રયે ।
વાઞ્છિતાખિલદાયાસ્તુ પદ્મનાભાય મઙ્ગલમ્ ॥ ૧૦॥

સર્વાવયવસૌન્દર્ય સૌવર્ણસુષમા જુષે ।
સદા સમ્મોહનાયાસ્તુ પદ્મનાભાય મઙ્ગલમ્ ॥ ૧૧॥

યોગેશ્વરાય કૃષ્ણાય નરસિંહાય યોગિને ।
યોગમુદ્રાભિરામાય પદ્મનાભાય મઙ્ગલમ્ ॥ ૧૨॥

અનન્તપુરનાથાય નિરન્તરદયામુચે ।
અનન્તપદ્મનાભાય નિત્યશ્રીઃ નિત્યમઙ્ગલમ્ ॥ ૧૩॥

ઇતિ શ્રીઅનન્તપદ્મનાભમઙ્ગલસ્તોત્રં સમ્પૂર્ણમ્ ।

*Shri Anantapadmanabha Mangala Stotram*
pdf was typeset on July 4, 2025

Please send corrections to *sanskrit@cheerful.com*